# B.KUMAR'S ACADEMY

| | | |
|---|---|---|
| **विषय** : संस्कृत | **QUESTION PAPER** | **गुणाङ्काः** : २० |
| **इयत्ता** : १० वी | **गद्य १. आद्यकृषकः पृथुवैन्यः।** | **वेळ** : ४५ मि. |

**प्र. १ : अ) चित्रं दृष्ट्वा नामानि लिखत। (३ तः २)** १





**आ) सङ्ख्याः अक्षरैः / अङ्कैः लिखत। (३ तः २)** १

१) नवसप्ततिः (२) १५ ३) ६४

**इ) समयं मेलनम् कुरूत** २

| **अ** | | **ब** |
|---|---|---|
| १) विंशत्यधिक पञ्चवादनम् | - | ५.४५ |
| २) षड्वादनम् | - | ८.१५ |
| ३) सपाद अष्टवादनम् | - | ६.०० |
| ३) पादोन षड्वादनम् | - | ५.२० |

**प्र. २ : अ) गद्याशं पठित्वा निर्दिष्टा कृतीः कुरुत।**

> भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट् । प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

**क) पूर्णवाक्येन उत्तरं लिखत। ( २ तः १)** १

१) चारणाः किमर्थम् उत्सुकाः?

२) प्रथमः अभिषिक्त : सम्राट कः; आसित् ?

**ख) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।** १

१) प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत् ।

२) स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः न अभवत् ।

**ग) कः कं वदीत?** १

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 **+91 9619619937, 0250-2334511**

“तिष्ठन्तु चारणा:!”


**घ) प्रश्ननिर्माणं कुरुत।** **१**

स्तवनं तु ईश्वरस्यैव भवेत् ।

**च) मेलनं कुरुत।** **१**

| | |
|---|---|
| ‘विशेषणम् | विशेष्यम् |
| प्रजाहितदक्ष: | प्रजा |
| कृशा: | पृथु: |

**छ) जालरेखाचित्रं पूरयत।** **२**




**आ) गद्यांश पठित्वा निर्दिष्टा: कृती: कुरुत।**

| |
|---|
| एकदा पृथुराज: स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजा: अतीव कृशा: अशक्ताश्च । ता: प्रजा: पशुवज्जीवन्ति। निकृष्टान्नं खादन्ति। तद् दृष्ट्वा राजा चिन्ताकुल: जात:। तदा पुरोहितोऽवदत्, “हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुत: वसुन्धराया: उदर एव वर्तते। तत्प्राप्तुं यतस्व।” <br><br> तदा पृथुभूपेन तदर्थं धनु: सज्जीकृतम्। तदा भूमि: स्त्रीरूपं धृत्वा तस्य पुरत: प्रकटिता अभवत् अवदत् च, “हे राजेन्द्र! तव पिता दु:शासक: वेनराज: राजधर्मस्य पालनं नाकरोत् । तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि। त्वं तु प्रजाहितदक्ष: नृप:। यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अत: धनु: त्यज। खनित्राणि, हलान्, कुद्दालकानि लवित्राणि च हस्ते गृहीत्वा प्रजाजनै: सह कृषिकार्यं कुरु।” |

१) अवबोधनम्

क) पूर्णवाक्येन उत्तरत। १

१) भ्रमणसमये पृथुराजेन किं दृष्टम् ?

ख) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत। १

१) राजा चिन्ताकुला: जात:।

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 **+91 9619619937, 0250-2334511**

२) दुःशासकः वेनराजः राजधर्मस्य पालनं करोत् ।

ग) कः कं वदति? १


"त्वं तु प्रजाहितदक्षः नृपः।"

घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः? १

च) सन्धिविग्रहं कुरुत। (२ तः १) १

१) पुरोहितोऽवदत् (२) पशुवज्जीवन्ति

छ) जालरेखचित्रं पूरयत। २




**प्र. ३ : व्याकरणम् ।**

**१) नामतालिकांपूरयत** **१**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भगवान् | भगवन्तौ | ............ |
| द्वितीया | .......... | शशिनौ | शशिनः |

**२) क्रियापदतालिकां पूरयत।** **१**

| एकचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| जानाति | ........... | जानन्ति | प्रथमः |
| .......... | जानीवः | जानीमः | उत्तमः |

B.KUMAR'S ACADEMY

***

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

| | | | |
|---|---|---|---|
| **विषय** : संस्कृत | **QUESTION PAPER** | **गुणाङ्काः** | : २० |
| **इयत्ता** : १० वी | **गद्य २. व्यसने मित्र परीक्षा पद्य - ३ सूक्तिसुधा** | **वेळ** | : ४५ मि. |

**प्र. १ : गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत**

अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः। क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः । मृगशृगालौ दृष्ट्वा काकोऽवदत्, "सखे चित्राङ्ग! कोऽयं द्वितीयः?" मृगः अब्रूत, "जम्बूकोऽयम् अस्मत्सख्यम् इच्छति।" काकः उपादिशत्, "अकस्मादागन्तुना सह मित्रता न युक्ता।" तदाकर्ण्य जम्बूकः सकोपम् आह, "मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत् यथायं मृगः मम बन्धुः तथा भवानपि।" मृगः अब्रवीत्, "अलं विवादेन। वयं सर्वे आनन्देन एकत्र निवसामः।" काकेनोक्तम्, "एवमस्तु।"

**क) पूर्णवाक्येन उत्तरं लिखत।** २

१) अरण्ये कौ निवसतः स्म?

२) काकः किम् उपादिशत् ?

**ख) कः कं वदति?** १

"सखे चित्राङ्ग ! कोऽयं द्वितीयः?"

**ग) प्रश्ननिर्माणं कुरुत।** २

१) <u>मृगः</u> अब्रूत, जम्बूकोऽयम् ।

२) क्षुद्रबुद्धिः <u>मृगेण</u> सह मृगस्य निवासस्थानं गतः।

**घ) उत्तरपदं लिखत।** १

काकोऽवदत् = काकः + ............।

**च) स्तम्भमेलनं कुरुत।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| १) दृढः | सकोपम् |
| २) जम्बूकः | बन्धः |

**प्र. २ : गद्याशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत् 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत् । तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः। तत्रागतः मृगः पाशैर्बद्धः। सः अचिन्तयत्, "इदानीं मित्राण्येव शरणं मम।" दूरात् तत् पश्यन् जम्बूकः मनसि अनान्दितः। सोऽचिन्तयत्, "फलितं मे मनोरथम् । इदानीं प्रभूतं भोजनं प्राप्स्यामि।" मृगस्तं दृष्ट्वा अब्रवीत्, "मित्र, छिन्धि तावन्मय बन्धनम् । त्रायस्व माम् ।" जम्बूको दूरादेवावदत्, "मित्र, दृढोऽयं बन्धः। स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?" इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः ।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः । मृगं तथाविधं दृष्ट्वा स उवाच, "सखे! किमेतत्? मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम्। उक्तं च -

सुहृदां हितकामानां यः शृणोति न भाषितम् ।

विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः॥"

**क) पूर्णवाक्येन उत्तरं लिखत।** २

१) मृगः प्रत्यहं क्षेत्रं गत्वा किम् अकरोत्?

२) एकस्मिन् दिने क्षेत्रपतिना किम् योजितः?

**ख) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।** १

१) जम्बूकः मनसि आनन्दितः।

२) वने एकं सस्यपूर्ण क्षेत्रं न अस्ति।

**ग) माध्यमभाषया उत्तरत।** २

१) 'स नरः शत्रुनन्दनः इति वचनं कथायाः आधारेण स्पष्टीकुरुत?

**घ) विरुद्धार्थक शब्दं लिखत।** १

१) बद्धः २) मैत्री

B.KUMAR'S ACADEMY

**प्र. ३ : पद्यांशं पठित्वा निर्दिष्टा कृतीः कुरुत।**

अ) रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः

निरालम्बो मार्गश्चरणविकलः सारथिरपि।

रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः

कियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥४॥

१) पूर्णवाक्येन उत्तरत। (२ तः १) १

१) रवे रथस्य कति तुरगाः सन्ति?

२) रवेः सारथिः कीदृशः अस्ति?


२) सन्धिं कुरुत। १

रथस्य + एकं

३) समानार्थक शब्दान् लिखत। १

१) सूर्य:- २) अश्व:-

४) जालरेखाचित्रं पूरयत। २




**प्र. ४ : व्याकरणम् ।**

१) नामतालिकां पूरयत (४ त : २) १

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| षष्ठी | जन्मन: | == | == |

२) योग्यं रूपं योजयत् । १

1) neebe ...... jlveej bUÙÚe (हनुमत्)

२) तारका: ...... शोभन्ते। (व्योमन् )

***

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

विषय : संस्कृत
इयत्ता : १० वी

**QUESTION PAPER**

**गद्य -४ : अमूल्यंकमलम् गद्य -५ स एवं परमाणुः।**

गुणाङ्का : २०
वेळ : ४५ मि.

**प्र. १ : गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

आसीत् सुदासो नाम कश्चिदुद्यानपाल: । तस्य तडागे कदाचित् सत्यपि शिशिर - ऋतावेकं पद्मं व्यकसत्, व्योम्नीव बालसूर्यबिम्बम्। सोऽचिन्तयत्, 'अहो महिमा परमात्मनः, यदेतादृशे कालेऽतिशीते विभूषितो मे तडाग एतस्य सरसिजस्य विकासेन। एतत् सरसिजं विक्रीयाहं विपुलं धनं प्राप्नुयाम्' इति । एवं सञ्चिन्त्य स तद् विक्रेतुं राजसद्मनः पुरतः स्थितः। अत्रान्तरे तेनैव अध्वना कश्चित् श्रीमान् सार्थवाहः समायातः । सोऽवदत्, 'भद्र, भगवान् सुगतः सम्प्रत्येतस्मिन्नगरे वसति। महात्मनः तस्य पूजार्थमिदं कमलमभ्यर्थये। तत्कियता मूल्येन ददासि?' उद्यानपालोऽब्रवीत्, 'एकेन सुवर्णनाणकेन' । अथ स सार्थवाहः यावत्तत् कमलं क्रेतुमिच्छति, तावदेवापरो धनवान् श्रेष्ठी अपि सुगतदर्शनार्थं गच्छन् तत्र समुपस्थितः। नीरजमूल्यं पृच्छन्तं तं श्रेष्ठिनम् उद्यानपालोऽब्रूत 'एष महाभाग एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति' । श्रेष्ठी अगदत्, 'अहं दश सुवर्णनाणकानि यच्छामि'। सार्थवाहोऽभणत्, 'अहं शतं सुवर्णनाणकानि प्रयच्छामि'। तयोर्विवादं श्रुत्वा सुदासो व्यमृशत् 'यस्य कृते एतौ कमलमेतत् क्रेतुमिच्छतः, नूनं स सुगत एवाधिकतमं मूल्यं मह्यं दद्यात्' इति। अतः स उद्यानपालस्तावभाषत 'नैतद् भो विक्रेतुमिच्छामि' इति।

**१) अवबोधनम् ।**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

१) अहं .......... सुवर्णनाणकानि प्रयच्छामि।

अ) सहस्त्रं ब) लक्षं क) कोटी ड) शतं

२) .......... ऋतौ पदमं व्यकसत् ।

अ) वसन्तः ब) हेमन्त : क) ग्रीष्म : ड) शिशिर :

**ख) कः कं वदति?** १

"अहं दश सुवर्णनाणकानि यच्छामि।"

**ग) पूर्णवाक्येन उत्तरत। (२ तः १)** १

१) सुदासः कः आसीत्?

२) पद्मं कदा व्यकसत्?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।** १

१) सुदासः उद्यानपालः आसीत्

२) भगवान सुगत दूरे वसति।

**च) एषः गद्यांशः कस्मात् पाठात् उद्धृतः?** १

D KUMAR'S ACADEMY

छ) प्रश्ननिर्माणं कुरुत। १

महात्मनः तस्य पूजार्थमिदं कमलमभ्यर्थये।

ज) सन्धिविग्रहं कुरुत। (२ त : १) १

१) कश्चिदुद्यानपालः -

२) क्रेतुमिच्छति -

**प्र. २ : गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

पिता - सम्यग् उक्तं त्वया । यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरं भागं प्राप्तुं न शक्यते सः एव परमः अणुः।
अर्णवः - द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु?
पिता - सत्यम्। अयं खलु कणादमहर्षेः सिद्धान्तः । अपि जानासि? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपपादितम् । तदपि प्रायः ख्रिस्तपपूर्वं पञ्चमे षष्ठे वा शतके।
अर्णवः - तात, महर्षिण कणादेन किं किम् उक्तं परमाणुविषये? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः।
पिता - कणादमुनिना प्रतिपादितम् - परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता।
अर्णवः - का सा व्याख्या?
पिता - जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः।
तस्य षष्ठतमो भागः परमाणुः स उच्यते।।

**१) अवबोधनम्**

**क) पूर्णवाक्येन उत्तरं लिखत। (२ तः १)** १

१) कः परमाणु?

२) कस्मिन् ग्रन्थे परमाणोंः व्याख्या कृता?

**ख) कः कं वदति?** १

"अयं खलु कणादमहर्षेः सिद्धान्तः अपि जानासि।"

**ग) प्रश्ननिर्माणं कुरुत।** १


महर्षिणा कणादेन परमाणुविषये प्रतिपादितम्।

**घ) उचित पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

१) ......... द्रव्यस्य मूलकारणम् । (परमाणुः / विज्ञानं)

२) अणुभ्यः ........ परमाणवः। (सूक्ष्मतराः / स्थूलतराः)

**च) जालरेखाचित्रं पूरयत।** **२**




**छ) लकारं लिखत।** **१**

वयं महाभागस्य नामधेयं जानीम:।

**प्र. ३ : व्याकरणम्**

१) नामतालिकां पूरयत। १

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| ............. | ब्रह्मभ्याम् | ब्रह्मभि: | तृतीया |
| राजानम् | .......... | राज्ञ: | द्वितीया |

२) सर्वनामतालिकां पूरयत। (३ त : २) १

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| अहम् | ........... | वयम् | प्रथमा |
| स: | तौ | .............. | प्रथमा |

३) क्रियापदतालिकां पूरयत। (३ त : २) १

| ए. व. | द्वि. व | ब. व. | पुरुष: |
|---|---|---|---|
| जानीते | जानाते | .......... | प्रथम: |
| .......... | जानीवहे | जानामहे | उत्तम: |

४) सूचनानुसारं कृती: कुरुत। ३

१) त्वं किम् इच्छसि?

('त्वम्' इत्यस्य स्थाने 'भवान्' इति योजयत।)

२) तयो: विवादं श्रुत्वा सुदासो व्यमृशत् ।

(पूर्वकालवाचक - त्वान्त अव्ययं निष्कासयत् ।)

३) अहं विपुलं धनं <u>प्राप्नुयाम्</u> ।

(लकारं लिखत)

****

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 **+91 9619619937, 0250-2334511**

| | | |
|---|---|---|
| **विषय** : संस्कृत | **Question Paper** | **गुणाङ्का** : २० |
| **इयत्ता** : १० वी | **पद्य : ६. युग्ममाला** | **वेळ** : ४५ मि. |

**प्र. अ) पद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥


**१) पूर्णवाक्येन उत्तरं लिखित।** २

i) मनुष्य द्विप इव मदान्धः कदा भवति?

ii) 'मूर्खः अस्मि' इति मनुष्येण कुतः अवगतम्?

**२) पद्यांशतः विशेषणं चिनुत।** १

**३) रेखाचित्रम्** १




**प्र. २: पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा ॥१॥

**१) पूर्णवाक्येन उत्तरं लिखत। (२ तः १)** १

i) कनकपरीक्षा कथं भवति?

ii) पुरुषपरीक्षा कथं भवति?

**२) सन्धिः । पूर्वपदं लिखत। (२ तः १)** १

i) .......... + अस्ति = नास्ति ।

ii) ......... + अस्मि + इति = मूर्खोऽस्मीति ।

**३) माध्यमभाषया उत्तरं लिखत।** २

'यथा चतुर्भिः' इति श्लोकस्य स्पष्टीकरणं लिखत ।

**प्र.३:अ) पदये शुद्धे पूर्णे च लिखत। (२ तः १)** २

i) तावद् ------------तयोचितम् ॥

ii) उत्तमो --------- प्रजायते ॥

**आ) अन्वयं पूरयत।** २

यावत् भयम् -------- तावत् हि भयात

----------- । तथापि आगतं तु भयं

--------- नरः ---------- कुर्यात्।

**प्र.४: लेखन कौशलम् ।**

**अ) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (२ तः १)** १

i) ........... रक्तपुष्पाणि रोचन्ते। (भगवत)

ii) माता- --------- स्निह्यति (पुत्र)

**आ) ५/७ वाक्यात्मकं निबन्धं लिखत किमपि एकं विषये।** ५

i) मम प्रियः उत्सवः

ii) मम प्रियः खगः

iii) मम प्रियः भाषा।

**प्र.५ भाषाभ्यासः।**

**१) समासानां तालिकापूर्तिः कुरुत।** २

| सामासिक पदम् | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| चिन्ताकुलः | ................ | तृतीया तत्पुरुषः |
| ............... | प्रिया भाषा | कर्मधारय |

***

B.KUMAR'S ACADEMY

# B.KUMAR'S ACADEMY

| | | |
|---|---|---|
| **विषय** : संस्कृत | **Question Paper** | **गुणाङ्का** : २० |
| **इयत्ता** : १० वी | **गद्य -७ संस्कृतनाट्यस्तबकः। पद्य -८ : वाचनप्रशंसा।** | **वेळ** : ४५ मि. |

**प्र.१ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

| | | |
|---|---|---|
| वैखानस | :- | (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम् । राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् । |
| दुष्यन्त : | - | प्रतिसंहृत एषः सायकः । (यथोक्तं करोति) |
| वैखानस | :- | राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः । |
| दुष्यन्तः | - | तपोवननिवासिनामुपरोधो मा भूत् । अत्रैव रथं स्थापय यावदवतरामि। |
| सूतः | - | धृताः प्रग्रहाः । अवतरतु आयुष्मान् । |
| दुष्यन्तः | - | (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः। |
| सूतः | - | तथा । (इति निष्क्रान्तः।) |

**१) माध्यमभाषया उत्तरं लिखत ।** २

i) दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते ?

**२) गद्यांशं पठित्वा सरलार्थं लिखत ।** २

१) आश्रममृगोऽयं न हन्तव्यः न हन्तव्यः ।

२) तपोवननिवासिनामुपरोधो मा भूत ।
अत्रैव रथं स्थापय यावदवतरमि ।

**प्र.२: पद्य विभाग**

**१) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।**

शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ॥१॥
मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ॥२॥
वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ॥३॥
अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ॥४॥
वृथाभ्रमणकुक्रीडापरपीडापभाषणै : ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ॥५॥
वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ॥६॥

**१) पूर्णवाक्येन उत्तरं लिखत ।(२ तः १)** १


१) वाचनेन के गुणा: वर्धन्ते ?

२) विद्यार्थिना कथं कालक्षेप: न कर्तव्य: ?

**२) विशेषणं - विशेष्याणां मेलनं कुरूत ।** २

| **विशेषणं** | **विशेष्यम्** |
|---|---|
| उपकारकम् | कविपण्डिता: |
| बहून | वाचनम् |
| दक्षा: | विषयान् |
| प्राचीना: | मनुजा: |

**३) जालरेखाचित्रं पूरयत।** २




**४) सन्धिविग्रहं कुरुत। (केवलम् १)** १

i) पठेत्सदा। ii) कालक्षेपो न।

**५) विरुद्धार्थकं शब्दान् लिखत।** १

i) सद्गुण × ii) प्राचीना: ×

**प्र.३.लेखनकौशलम्**

**संस्कृतानुवादं कुरुत।** ५

i) आकाशात मेघ आहेत.

ii) कावळ्याचा रंग काळा आहे

iii) दोन मुले शाळेत जात आहेत.

iv) शेतकरी शेतामध्ये बिया पेरतो.

v) बाळकृष्ण गोकुळात गोपालन करत होता.

**प्र.४: व्याकरणम्**

**१) नामतालिका पूरयत।(५ तः २)** १

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| ................ | ब्रह्मभ्यासम् | ब्रह्मभि: | तृतीया |
| वर्त्म | वर्त्मानि | प्रथमा | |

**२) क्रियापदतालिकां पूरयत। (६ तः २)** १

| ए. व. | द्वि. व. | ब. व. | पुरुष: |
|---|---|---|---|
| ……… | जीवत: | ……… | प्रथम: |

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank,
Vasai West, Vasai-Virar, Maharashtra 401202 **+91 9619619937, 0250-2334511**

**३) सूचनानूसारं कृतीः कुरुत। (३ तः २)** २

i) अहं विपुलं धनं प्राप्नुयाम् । (लकारं लिखत)

ii) त्वं किम् इच्छासि? (त्वम् इति स्थाने '<u>भवान्</u>' इति योजयन्)

iii) मे आत्मा कृतार्थतां लभताम् । (लङ्लकारे वाक्यं परिवर्तयत)

****

B.KUMAR'S ACADEMY

| | | |
|---|---|---|
| **विषय** : संस्कृत | **Question Paper** | **गुणाङ्का** : २० |
| **इयत्ता** : १० वी | **गद्य : ९. धेनोर्व्याघ्र पलायते।** | **वेळ** : ४५ मि. |

**प्र. १ : गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

शिबिरस्य प्रथमदिने एव भोजनादिकं समाप्य मध्याह्ने बालैः सह पत्रक्रीडायां मग्नः आसम् अहम्। तदा सद्यः एव परिचितः प्रोफेसर - सर्कसवाले (सर्कस - क्रीडारङ्गस्य स्वामी) मामेव अन्विष्यन् तत्र समागतः । "कॅप्टनसाहेब, शृणोतु कॅप्टनसाहेब! अस्माकं सर्कसक्रीडायां कतिपयेभ्यः मासेभ्यः लोकप्रियः सहभोजनकार्यक्रमः प्रचलति । गौः, भल्लूकः व्याघ्रश्च इत्येतेषाम् पशूनाम् अयं कार्यक्रमः प्रयोगस्य सर्वोच्चम् आकर्षणम् अस्ति। तथा विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि। परन्तु व्याघ्र - भल्लूकयोः कलहकारणात् द्वावपि व्रणितौ।" "किं प्राणिनोः कलहः?" "महाशय, अस्माकं सर्कसक्रीडायां तु व्याघ्र - भल्लूकौ द्विपादौ एव।" एवं प्राध्यापकमहाशयेन रहस्यभेदः कृतः। "नास्ति अस्माकम् सामर्थ्यं व्याघ्रं वा भल्लूकं वा पालयितुम् । क्रीडायां द्वौ बहुरूपधारिणौ नरौ एव व्याघ्रं भल्लूकं च नाटयतः।" "किं धेनुरपि...?" "नहि नहि, धेनुस्तु वास्तविकी एव।" "हंऽऽ... कथयतु तर्हि किं मया करणीयम् अत्र?" "अहं प्रार्थये यत् भवतः बालवीरचमूतः कौ अपि द्वौ सैनिकौ अद्यतनक्रीडायां यदि व्याघ्र - भल्लूकवेषौ धृत्वा प्रेक्षकाणां मनोरञ्जनं कुर्यातां तर्हि महान् उपकारः स्यात् । कृपया साहाय्यं करोतु।"

**१) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** १

i) प्रोफेसर - सर्कसवाले अन्विष्यन् यतः -----------

अ) विज्ञापनं करोति।

ब) सहभोजनं कार्यक्रमं करोति।

**२) कः कं वदति?** १

"कृपया साहाय्यं करोतु।"

**३) पूर्णवाक्येन उत्तरं लिखत।** १

चिमणरावः कस्यां मग्नः?

**४) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।** १

व्याघ्रः भल्लूकौ कलहकारणात् द्वापि व्रणितौ।

**५) सन्धिविग्रहं लिखत। (२ तः १)** १

i) द्वावपि = द्वौ + .......... ।

ii) ....... + अपि = धेनुरपि।

B.KUMAR'S ACADEMY

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

**६) क्रमेण योजयत।** २

१) शिबिरस्य प्रथमं दिनम् ।

२) सर्कसस्वामिनः साहाय्ययाचना।

३) सहभोजनस्य रहस्यभेदः।


४) सर्कसस्वामिनः अ ागमनम् ।

**प्र. २ : लेखन कौशलम् ।**

मञ्जूषातः उचित शब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत। ५

**बसस्थानकम्**

**मञ्जुषाः** (वृक्षाः, तिष्ठन्ति, दर्शयति, विक्रेतारं, कर्कटीः महिलायाः धावतः बसस्थानकस्य)



**प्र. ३ : व्याकरणम् ।**

**१) समानार्थक शब्दान् लिखत।** १

i) भल्लूकः - ........... ।

**२) विरुद्धार्थक शब्दान् लिखत।** १

i) गतः × ............ ।

ii) अभेदः × ......... ।

**प्र. ४ : अपठितम् ।**

**अ) गद्यांशं पठित्वा कृतीः कुरुत।**

मारुतिः सीतायाः अन्वेषणार्थं लङ्कां प्रति उड्डयते। मों महासागरः अस्ति। तस्य तले अवर्तत मैनाकः नाम पर्वतः। यदा मैनाकः गगने मारुतिं पश्यति तदा सः उद्गाच्छति। समुद्रावर बहिः आयाति। मारुतिना क्रमणीयः मार्गः दीर्घः। मध्ये विश्रामार्थं स्थानमपि नास्ति इति मैनाकः जानाति। सः तस्य साहाय्यं कर्तुम् इच्छाति। अतः मैनाकः मारुतिं प्रार्थयेत, "हे महाकपे! अलं परिश्रमेण, कृपया मम कूटे विश्राम करोतु।" किमर्थं मैनाकः मारुते साहाय्यर्थम् उदयुक्तः? अपि सः मारुतेः आशीर्वचनम् इच्छति? न खलु। एतत् तु उपकारस्य स्मरणम् ।

B.KUMAR'S ACADEMY

**१) पूर्णवाक्येन उत्तरत। (केवलम् १)** १

i) मारुतिः कस्या अन्वेषणार्थं उड्डयते?

ii) पर्वतस्य नाम किम् ?

**२) प्रतिपदिकं लिखत।** १

i) आयाति।

ii) जानाति।

**३) वाक्यं पुनर्लिखित्वा सत्यं / असत्यम् इति लिखत।** १

i) मार्गे महासागरे नास्ति।

ii) मार्गे विश्रामस्थानं अस्ति।


**आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

> न देवो वर्तते काष्ठे न पाषाणे न मृण्मये।
> भावे हि विदयते देवः तस्माद् भावो हि कारणम् ॥

**१) पूर्णवाक्येन उत्तरत।** १

i) देवः कुत्र वर्तते?

**२) जालरेखाचित्रं पूरयत।** २




***

| | | |
|---|---|---|
| **विषय** : संस्कृत | **Question Paper** | **गुणाङ्का** : २० |
| **इयत्ता** : १० वी | **गद्य : १०. नदीसूक्तम। ११. जटायुशौर्यम् ।** | **वेळ** : ४५ मि. |

**प्रथम : विभाग:। गद्यम् ।**

**प्र. १ : गद्याशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

विश्वामित्र: - कथं लङ्घनीय: प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च।।
कथं याचितव्यस्तरणाय मार्ग:, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।
नदी (विपाट्) - क: खलु एष: मानव: ? अस्मान् किमर्थं वन्दते स्तौति च? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति?
विश्वामित्र: - अयि मात:, विश्वामित्रोऽहम् । दूरत: आयात: रथै: शकटै: च। वयं सर्वे परतीरं गन्तुं समुत्सुका:।
नदी (शुतुद्री) - विप्रवर, मधुरा खलु ते वाणी । रञ्जयति अस्मान् । वद कथं तव साहाय्यं कर्तव्यम् ?
विश्वामित्र: - अम्ब, शृणु मे अभ्यर्थनाम् । गाधा मे भविष्यसि? स्वल्पीभवतु जलौघ: ।
येन वयं सुखेनैव परतीरं प्राप्तुं शक्नुम:।
नदी (विपाट्) - देवेन्द्र: खलु परमेश्वर: मार्गं मह्यं प्रदत्तवान् ।
हत्वा वृत्रं वज्रहस्त: नदीप्रवाहं विमुक्तवान् ।।
मया न कार्या तस्य अवज्ञा क्रुद्धो देवो भविष्यति।
क्षमस्व विश्वामित्र कदापि नैव विराम: सम्भवति।।

**१) माध्यमभाषया उत्तरं लिखत।** २

विश्वमित्र: नदयौ किं प्रार्थयते?

**२) उपरी गद्यांशस्य माध्यम भाषया सरलार्थ लिखत।** ४

**प्र.२ : द्वितीय विभागः पदयम्**

**पदयांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।**

सा गृहीताऽतिचुक्रोश रावणेन यशस्विनी।
रामेति सीता दु:खार्ता रामे दूरगते वने।।१।।
सा तदा करुणा वाचो विलपन्ती सुदु:खिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना।।२।।
जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा।।३।।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च ददर्श स: ॥४॥
तत: पर्वतशृङ्गाभस्तीक्ष्णतुण्ड: खगोत्तम:।
वनस्पतिगत: श्रीमान्व्याजहार शुभां गिरम् ॥५॥

**१) पूर्णवाक्येन उत्तरं लिखत।** १


१) राम: कुत्र गत:?

**२) सन्धिविग्रहं कुरूत । (२ त: १)** १

१) ददर्शायतलोचना =

२) राक्षसेन्द्रेणाकरूणां =

**३) जालरेखाचित्रं पूरयत।** २




**४) समानार्थक शब्दान् लिखत।** १

१) सीता २) दशानन:।

**प्र. ३ : तृतीय विभाग:।**

**पञ्च/सप्त वाक्यात्मकं निबधं लिखत । (केवलम्।)** ५

१) मम प्रिय: नेता।

२) मम प्रिय: पुस्तकम्।

३) मम प्रिय: कवि।

**प्र. ४ : व्याकरणम्**

**१) क्रियापद तालिका पूरयत। (५ त: ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: |
|---|---|---|---|
| ................ | .............. | अभवन् | प्रथम: |
| गमिष्यसि | ............. | ............ | मध्यम: |
| .............. | पश्याव: | पश्याम: | उत्तम |

B.KUMAR'S ACADEMY

**२) सङ्ख्या वाचकानां योग्यं रूपं लिखत। (केवलम्।)** १

१) भगवता व्यासेन ............ (१८) पुराणानि रचितानि।

२) .......... (४) वेदा:/सन्ति।

**३) सूचनानुसारं कृती: कुरुत। (केवलम्।)** १

१) सीता वनस्पतिगतं गृध्रं ददर्श। (लङ्लकारे परिवर्तयत)

२) रावण : खड्गमुद्धृत्य पक्षौ अच्छिनत् ।
(पूर्वकालवाचकम् अव्ययं निष्कासयता)

***

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank,
Vasai West, Vasai-Virar, Maharashtra 401202 📞 +91 9619619937, 0250-2334511

# B.KUMAR'S ACADEMY

**विषय** : संस्कृत | **Question Paper** | **गुणाङ्का** : २०

**इयत्ता** : १० वी | **गद्य : १२. आदिशङ्कराचार्यः। पदयः १३. चित्रकाव्यम्** | **वेळ** : ४५ मि.

**प्र. १ : गदयांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः। यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात् । तदा शङ्करः उच्चैः आक्रोशत् । “अम्ब! त्रायस्व नक्रात् त्रायस्व!” आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत। शङ्करः मातरम् आर्ततया प्रार्थयत - “अम्ब, इतःपरम् अहं न जीवामि। मरणात् पूर्वं संन्यासी भवितुम् इच्छामि। अधुना वा देहि अनुमतिम्।” चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - “वत्स, यथा तुभ्यं रोचने तथैव भवतु। इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति” इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः। स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवबोधयम्। संन्यासी न केवलम् एकस्याः पुत्रः। विशालं जगद् एव तस्य गृहम्। ‘मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि’ ङति मात्र प्रतिश्रुत्य सःगृहात् निरगच्छत्। ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत्। तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत्।

**१) पूर्णवाक्येन उत्तरं लिखत।** २

१) शङ्करः स्नानार्थं कुत्र गतः?

२) मरणात् पूर्वं शङ्करः किम् इच्छति?

**२) प्रश्ननिर्माणं कुरुत।** १

१) नक्रात् मुक्तः शङ्करः मातुः चरणौ प्राणमत् ।

**३) मेलनं कुरुत।** १


| विशेष्यम् | विशेषणम् |
|---|---|
| शङ्करः | मलिनकायः। |
| जगत् | विरक्तः। |
| मनुष्यः | विशालम् । |

**४) सन्धि विग्रहं कुरूत।** १

१) तथैव = तथा + ..........।

२) तत् + क्षणम् + ........ = तत्क्षणमेव।

**५) जालरेखाचित्रं पूरयत्।** २




A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

**द्वितीय विभागः। (पदम्)**

**प्र. २ : पदयांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**


रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥२॥
वैद्यराज नमस्तुभ्यं यमराजसहोदर। यमस्तु हरति प्राणान् त्वं
तु प्राणान् धनानि च ॥३॥- (हास्योक्तिः)

**१) पूर्णवाक्येन उत्तरत।** २

१) कविः कं 'मित्र' इति सम्बोधयति?

२) वैद्यराजः किं किं हरति?

**२) जालरेखाचित्रं पूरयत।** २




**३) मेलनं कुरुत।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | वचः |
| दीनम् | चातकः |

**प्र. ३ व्याकरणम्**

**१) समासानां तलिकापूर्ति कुरुत। (केवलम् १)** १

| सामासिकपदं | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| विदेशगमनम् | ................ | द्वितीया - तत्पुरुष |
| क्षेत्रपतिः | क्षेत्रस्य पतिः | ................. |

B.KUMAR'S ACADEMY

**२) समानार्थकं शब्दं लिखत।** १

१) यमः ........... । २) धनम् .......... ।

**३) सूचनेनुसारं कृतीः कुरुत। (केवलम् १)** १

१) यो जानाति स पण्डितः। (बहुवचने परिवर्तयत)

२) आचार्यः शिष्यगणेन सह गङ्गास्नानार्थं गच्छति स्म। ('स्म' निष्कासयत)

**प्र. ४ : अपठितम्**

**अ) गद्यांशं पठित्वा कृतीः कुरुत।**

भारतदेशे विशाले देशे सुदूरप्रान्तेभ्य: अन्यप्रांत प्रति प्रेषितानि पत्राणि विना विलम्बं विना प्रमादं कथं लभ्यन्ते? वयम् अस्माकं निवासविभागे पत्रपेटिकायां पत्रं क्षिपाम:। तत: तत पत्रालयं प्रति गच्छति। तत:च निर्दिष्टं स्थानं प्रति प्राप्नोति। कथं शक्य भवति एषा, वितरण व्यवस्था? 'पिन्काड् प्रणालि:' इत्येव एतस्य प्रश्नस्य उत्तरम् ।

पिन्कोड् क्रमाङ्क: नाम पत्रसङ्केतस्य अन्ते लिखिता: षट् सङ्ख्या। पिनकोड् नाम स्थानसङ्केताङ्क:। (PIN) Postal Index Number ऑगस्ट १९७२ तमे ख्रिस्ताब्दे स्वातन्त्र्यदिन समारोहे प्रधानमन्त्रि: - इन्दिरा - गान्धी महोदयायै उपहारीकृता एषा महत्त्वपूर्णा प्रणालि:। केन खलु प्रवर्तिता इयं सङ्केताप्रणाप्रणालि:? स पत्रालय: अधिकारी आसीत् संस्कृतपण्डित: गणितज्ञ: श्रीराम भिकाजी वेलणकर महोदय:।

**अ) एकवाक्येन उत्तरत।** १

१) पिन्कोड् प्रणालि: केन समारब्धा?

**आ) सत्यम् / असत्यम् वा लिखत।** १

पिन्कोड्क्रमाङ्के अष्ट सङ्ख्या अस्ति।

**इ) प्रतिपादिकम् (मूलशब्दं) लिखत।** १


१) एतस्य -

२) वयम् -

**आ) पदयांश पठित्वा जालरेखाचित्रं पूरयत।** २

वन्दे सरस्वती देवीं वीणापुस्तकधारणीम् ।

पदमासनां शुभ्रावस्त्रां कलाविद्याप्रदायिनीम् ॥




* * *

B.KUMAR'S ACADEMY

# Question Paper

| | | | |
|---|---|---|---|
| **विषय** : संस्कृत | | **गुणाङ्का** | : २० |
| **इयत्ता** : १० वी | **गद्य : १४. प्रतिपदं संस्कृतम्, पदय : १५. मानवताधर्मः।** | **वेळ** | : ४५ मि. |

**प्र.१ : गदयांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**

महोदया - अहं व्यवस्थापनप्रशिक्षिकारूपेण कार्यं करोमि। मया अवगतं यद् रामायण-महाभारत-हकरातार्जुनीय- रघुवंश- इत्यादिषु बहवः श्लोकाः सन्ति येषु व्यवस्थापनाशस्त्रस्य मूलतत्त्वानि दृष्टान्तसहितानि निर्दिष्टानि। अनरेनर काव्यमाध्यमेन विषयप्रवेषः सुगमः भवति। एषा पध्दतिः मया स्वीकृता जनैरपि अधिमता। अतः मया पुनरेकवारं संस्कृतभाषायाः संस्कृतकाव्यादीनां च अध्ययनं प्रारब्धम्।

महोदयः-अहो आश्चर्यम्! शालायाः अनन्तरं खण्डितं मम संस्कृताध्ययनम्। तदपि अनुनैव पुनः आरब्धम्।

महोदय,- वस्तुतः अहं वाणिज्यशाखायाः स्नातकः । विधिशाखायाः पदवीऽपि प्राप्ता मया। साम्प्रतं बहुराष्ट्रियसंस्थायां विधिविमर्शकरूपेण कार्यं करोमि । पदनुसृत्य कौटिलीयम् अर्थशास्त्रं, याज्ञवल्क्यस्मृतिः आदीनां ग्रन्थानाम् अध्ययनं साहाय्यकरं भवेत् इति गुरुभिः उक्तम् । अतः अधुना अहं शास्त्रविषयकाणां संस्कृतग्रन्थानाम् अध्ययने यत्नं करोमि। (स्यूतात् किमपि संस्कृतपुस्तकं दर्शयति।)

(तयोः पृष्ठतः केचन युवकाः गोष्ठिषु रताः। प्रसादः, समीरः, लीना तथा तनुजा इत्येतानि परस्परमित्राणि। तेषु अन्यतमः तत् पुस्तकं दृष्ट्वा महोदयम् उपगम्य वदति।)

समीरः - महोदय, भवतोः संवादे संस्कृतस्य सन्दर्भः श्रुतः मया । भवानपि विश्वसंस्कृतपरिषन्निमित्तं विदेशं प्रस्थितः?

महोदयः:- न खलु । परं कीदृशी एषा विश्वसंस्कृतपरिषद्? अपि भवान् संस्कृतस्य छात्रः?

**१) पूर्णवाक्येन उत्तरत।** २

१) महोदया किं रूपेण कार्यं करोति।

२) महोदयाः कस्य पदवी प्राप्ता?

**२) प्रश्ननिर्माणम् कुरूत।** १

बहुराष्ट्रिय संस्थायां विधि <u>विमर्शक</u> रूपेण कार्यं करोति।


**३) सन्धिविग्रहं कुरुत। (२ तः १)** १

१) तदनुसृत्य =

२) जनैरपि =

**४) मेलनं कुरुत।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | महिला |
| एका | जनाः |

**५) जालरेखाचित्रं पूरयत्।**  २



**प्र.२ : पदयांश पठित्वा निर्दिष्टाः कृतीः कुरूत।**

यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।१।।
षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।२।।
एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम्
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।३।।
सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा।।४।।
यथा प्रकाशयत्येको भानुर्भुवमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।५।।

**१) पूर्णवाक्येन उत्तरं लिखत।** २

१) सङ्गीते स्वराः कीदृशाः?

२) कः सर्वधर्मान् व्याप्नोति?

**२) सन्धि विग्रहं कुरूत।** १

भानुर्भुवनमण्डलम् =

**३) पाठात् ल्यबन्त अव्ययानि चित्वा लिखत।** १

**४) समानार्थक शब्द मेलनं कुरुत।(केवलम्।)** १

| | |
|---|---|
| १) सरीत् | अ) सलीलम् । |
| २) रङ्गः | ब) नदी |
| ३) अम्भः | क) वर्णः |

**प्र.३ : १) धातूनाम उपयोगं कृत्वा वाक्यनिर्माणं कुरुत।** १

राम: वनं .......... (गम् - गच्छ्)

बालकः दुग्धं ........ (पा - पिब् )

**२) संस्कृतानुवादं कुरुत।** ४

१) मी गोष्टीचे पुस्तक वाचते आहे

२) तू नृत्य करतेस.

३) सूर्याभोवती ग्रह फिरतात.

४) राम हा श्रेष्ठ राजा होता.

**प्र.४ : चतुर्थ विभागः ।** **<u>व्याकरणम्</u>**

**१) नाम तालिकां पूरयत।** १

| ए. व. | द्वि. व. | ब. व. | विभति: |
|---|---|---|---|
| दिशी | .......... | ........ | सप्तमी |

**२) सर्वनाम तालिकां पूरयत।** १

B.KUMAR'S ACADEMY

| ए. व. | द्वि. व. | ब. व. | विभक्तिः |
|---|---|---|---|
| एतेन | ............. | ........... | तृतीया |

**३) धातुसाधित विशेषण तालिकां पूरयत** १

| कृ. ८ (उ.प.) | क्तवतु | कृत्याः |
|---|---|---|
| .......... | ......... | कार्यः |

**४) सूचनानुसारं कृतीः कुरुत।** २

१) अहं वाणिज्य शाखायाः स्नातकः। **(बहुवचने परिवर्तयत)**

२) त्वं सर्वधर्मान् परित्यज्य, मानवतां भज। **(त्वं स्थाने 'भवान्' योजयता)**

* * *

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank,
Vasai West, Vasai-Virar, Maharashtra 401202 **+91 9619619937, 0250-2334511**